Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 3 | ISSN : 2582-0095

# शब्दकौस्तुभस्य प्रभाव्याख्यादिशा मङ्गलश्लोकसमीक्षा

राजेश मण्डल
शोधच्छात्र: ,व्याकरणविभाग:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:

**Artic Info**
Volume 5, Issue 3
Page Number : 117-120
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 10 May 2022

**सारांश:** – प्रारब्धेप्सितग्रन्थस्य निर्विघ्नेन समाप्तये, प्रचारपरिसमाप्त्यादिप्रतिबन्धकप्रत्यूहव्यूहप्रशमनाय च विद्वद्भि: ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलं विरच्यते। यद्यपि प्रमाणीभूतानामाचार्याणां कृति: प्रामाणिकी भवति तथापि मया शोधलेखेऽत्र वैद्यनाथपायगुण्डस्य प्रभाव्याख्यानुसारी खण्डनं विलिख्यते। अत्र च विश्वेशम्, अध्याहृत: तम् इति पदार्थविचार: चरीकर्त्ति वरीभर्त्ति सञ्जरीहर्त्ति इति यङ्लुग्विचार: च क्रियते।

**मुख्यशब्दा:** - शब्दकौस्तुभ:, प्रभाव्याख्यादिशा, मङ्गलश्लोक:, कृति:, अध्याहृत:, धातु:

संस्कृतवाङ्मये विद्यामानानां सर्वेषामपि विषयाणां मूलभूता भवन्ति वेदा:, अतोऽयं वेदराशि: सर्वथा सर्वयत्नेन संरक्षणीय:। तद्रक्षणाय च उपाय: व्याकरणाध्ययनम्। अत एव च व्याकरणशास्त्रमिदं वेदाङ्गेषु मुखत्वेन प्रामुख्यं भजते। तत्र भगवान् पतञ्जलि: महर्षिपाणिने: प्राय: 4000 अल्पाक्षरै: सूत्रै: विरचनां **अष्टाध्यायीमु**परि शास्त्रे समस्यानिवारणरूपं महाभेषजं महाभाष्यमिति व्याख्यानग्रन्थं रचयामास। अमुमेव ग्रन्थमनुसृत्य पदवाक्यप्रमाणपारावारपारीणेन श्रीमद्भट्टोजिदीक्षितेन सकलाष्टाध्याय्या अष्टाध्यायीक्रमेण शब्दकौस्तुभनामा व्याख्यानभूतो ग्रन्थो निरमायि। कैयटपन्थानुसारिणा विरचितस्य अस्य भाष्याब्धेरुद्धृतस्य शब्दकौस्तुभग्रन्थस्य स्थले स्थले स्वगुरो: महामहोपाध्यायनागेशसिद्धान्तोपस्थापनाय विद्वद्वर: वैद्यनाथपायगुण्डे-महोदय: प्रभाव्याख्यां निरमात्। तत्र च मङ्गलश्लोकमपि खण्डितं तै:। तदेव खण्डनपरविषयं समाश्रित्य शोधलेखोऽयं विरचितो मया। शब्दकौस्तुभस्य मङ्गलश्लोकस्तावद्

**विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत्।**
**चरीकर्त्ति बरीभर्त्ति संजरीहर्त्ति लीलया।।**
**नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुणित्रयम्।**
**श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान्बुधान्।।**
**नत्वा लक्ष्मीधरं तातं सुमनसोवृन्दवन्दितम्।**
**फणिभाषितभाष्याब्धे: शब्दकौस्तुभमुद्धरे।।**
**परिभाव्य बहून् ग्रन्थान्योऽर्थ: क्लेशेन लभ्यते।**
**तमशेषमनायासादितो गृह्णीत सज्जना:।।**
**समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम्।**
**भट्टोजिभट्टो जनुष: साफल्यं लब्धुमीहते।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति, आयुष्मत्पुरुषाणि च अध्येतारश्च मङ्गलयुक्ता यथा स्युः** इति **भूवादयो धातवः**[1] इति मङ्गलप्रयोजनसूत्रभाष्यमनुसृत्य तत्परिपालनाय प्रारब्धेप्सितग्रन्थस्य निर्विघ्नेन समाप्तये, प्रचारपरिसमाप्त्यादिप्रतिबन्धकप्रत्यूहव्यूहप्रशमनाय कृतं मङ्गलं शिष्यशिक्षणार्थं भट्टोजिदीक्षितेन ग्रन्थादौ- **विश्वेशमिति**। नमस्कार्य्यदेवतागुनगणवर्णनात्मकत्वात् इदं वस्तुनिर्देशकरूपं मङ्गलम्। अन्वयस्त्वस्य- **योऽखिलं जगत् लीलया चरीकर्त्ति बरीभर्त्ति संजरीहर्त्ति (तं) विश्वेशं सच्चिन्दान्दमहं वन्दे।** अत्र तम् इति पदमध्याह्रियते एकवाक्यताप्रतिपादनाय[2]।

❖ **अध्याहृतः तम् इति पदार्थविचारः- योऽखिलं जगत् लीलया चरीकर्त्ति बरीभर्त्ति संजरीहर्त्ति (तं) विश्वेशं सच्चिन्दान्दमहं वन्दे। इति** मङ्गलश्लोके वाक्यद्वयं विद्यते। चरीकर्ति इत्यादीनां क्रियापदानां कर्ता भवति आत्मा। वदिधातोः कर्ता भवति ग्रन्थकर्ता। वदिधात्वर्थवन्दनव्यापारविशिष्टफलाश्रयः कः इत्याकाक्षायां **योऽखिलं जगत् लीलया चरीकर्त्ति बरीभर्त्ति संजरीहर्त्ति** इति वाक्यार्थमन्वेति। तेन सम्पूर्णस्य वाक्यार्थस्य कर्मत्वापत्तिः। परन्तु वाक्यार्थस्य कर्मत्वमसम्भवं प्रातिपदिकत्वाभावात्। **कृत्तद्धितसमासाश्च** इति सूत्रे समासपदग्रहणेन **यत्र संघाते पूर्वपदं तस्य चेद्भवति तर्हि समासस्यैव** इति नियमेन वाक्यस्य प्रातिपदिकत्वन्न सम्भवति। शब्दार्थयोः परस्परयोः विशेष्यविशेषणभावाङ्गीकारात् तद्धितकृतोरिति न्यायेन योऽखिलम् इति वाक्यस्य कर्तृत्वेऽपि अर्थस्य कर्मत्वं स्वीक्रियते। तद्धितकृतोरिति न्यायस्यार्थस्तावद्- तद्धितान्ते कृदन्ते यादृशो गुणप्रधानभावस्तादृशस्यैव गुणप्रधानभावस्य बोधकं न भवति। किं तु कृत्तद्धितान्ततिङन्तयोर्विशेष्यविशेषणभावस्य व्यत्यासो दृश्यत इत्यर्थः। नियमस्य स्वीकारे तु नीलं घटम् इत्यस्य वाक्यस्यापि कर्मत्वापत्तिः। न्यायेन तु भावप्रधानतिङन्तार्थविहितस्य सत्त्वप्रधानार्थबोधकत्वरूपो विपर्ययः दृश्यते। तथा सति कटं भीष्मम् इत्यादौ भाष्यापत्तिः।

❖ **चरीकर्त्ति वरीभर्त्ति सञ्जरीहर्त्ति इति यङ्लुग्विचारः-** यङोऽचि[3] इति सूत्रेण प्रारभते युङ्लुक्प्रक्रिया। सूत्रेऽस्मिन् **बहुलं छन्दसि** [4]इति छन्दसि इति अनुवर्तते। तेन यङ्लुक्प्रक्रिया छन्दस्येव इति हेतोः कथं चरीकर्त्ति इत्यादयः मङ्गलश्लोके व्यवहृताः इति पृच्छा। अर्थात् यङ्लुकः छन्दोमात्रविषयत्वात् भाषायां न साधुः इति शङ्का।

हुश्नुवोः सार्वधातुके[5] इति सूत्रे हुश्नुग्रहणं भाषयामपि यङ्लुक्प्रयुज्यते इत्यत्र ज्ञापकम्। हुधातोः श्नुप्रत्ययान्तस्य चानेकाचोऽङ्गस्य च संयोगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके प्रत्यये परे इति तदर्थः। जुह्वति शृण्वति इति उदाहरणे। हु दानादनयोः इति जुहोत्यादिगणीयः धातुः। श्नुः इति स्वादिगणीयः विकरणप्रत्ययः। सार्वधातुके प्रत्यये परे हुश्नुः इत्येतेभ्यः भिन्नः न ह्यन्यदस्ति उवर्णान्तः यस्य प्रकृतसूत्रेण यण् भवति। अतः सूत्रे अन्यस्याभावात् हुश्न्वोः ग्रहणमनर्थक्यम्। अर्थात् सार्वधातुके इति सूत्रस्वरूं भवत्वित्याशयः। हुश्नुः इति व्यर्थं सत् भाषायामपि यङ्लुग् भवतीति ज्ञापयति।

---

[1] अष्टाध्यायी- 1-3-1

[2] तमित्यध्याहारेण वाक्यस्य भिन्नत्वेनादोषात्। शब्दकौस्तुभः, प्रभाव्याख्या,पृ-2

[3] अष्टाध्यायी- 2-4-74

[4] अष्टाध्यायी- 2-4-73

[5] अष्टाध्यायी- 6-4-87

युवं योयुवतीनां वृषभम् रोरुवतीनाम् इत्यादौ यथा छन्दसि योयु इत्यत्र, रोरु इत्यादिकं यथा यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तं विद्यते। एतेषां व्यावत्त्यर्थं हुश्नुग्रहणमिति प्रयोजनात् तज्ज्ञापकत्वं मास्तु।

छन्दस्युभयथा[6] इति सूत्रेण छन्दसि विषये सार्वधातुकमार्धधातुकञ्च उभयथा भवति। वर्धन्तु त्वा सुष्टुतयः इत्यत्र वर्धन्तु इत्यस्य आर्धधातुकत्वाण्णिलोपः। विशृण्विरे इति सार्वधातुकत्वात् श्नुः शृभावश्च। तथानेन सूत्रेण शतृप्रत्ययस्य आर्धधातुकत्वस्वीकारेण सार्वधातुकत्वाभावात् सूत्रस्याप्रवृत्तेः न भवति हुश्न्वोः प्रयोजनमिदम्। अतः पदमिदं व्यर्थं भवति। भाषायामपि यङ्लुक् प्रयुज्यते इति ज्ञापनान्तरं लोके योयुवती इत्यादौ यङ्लुगन्ते छन्दस्युभयथा इति सूत्रस्य छन्दरहितत्वात् अप्रवृत्तौ सार्वधातुके शतृप्रत्यये परे यणादेशं बाधितुं हुश्नुः इति स्वांशे चरितार्थो भवति। अस्य ज्ञापकस्य फलं तु भाषायां बेभिदीति चेच्छिदीति इत्यादयः यङ्लुगन्तास्साधवाः।

भाष्यकारेण बेभिदीति चेच्छिदीतीत्येतत्सिद्धं भवति भाषायामपि इत्यत्र इत्येतत्सिद्धं भवति भाषायामपि इति पदेन द्वयोरेव भाषायां प्रयोगः नान्ये भाषायां साधवः इति सूच्यते। विषयेऽस्मिन् नागेशमहोदयः- "छन्दस्युभयथा[7] इत्यनेनार्द्धधातुकत्वात्सिद्धम् इत्युक्त्वा एवन्तर्हि सिद्धे सति यद्धश्नुग्रहणं करोति चज्ज्ञापयत्याचार्यो भाषायामपि यङ्लुग्भवति। एवं विधप्रयोगद्वयस्यैवोपादानान्न सर्वत्र भाषायाम्भवतीति कल्प्यते। प्रयोगद्वयस्योदाहरमुलक्षणमिति प्राञ्चः। "

भाष्यस्य "किमेतस्य प्रयजनम्" इति प्रश्नस्य बीजं भवति लोके उवर्णान्तयङ्लुगन्तप्रयोगदर्शमेव। नागेशस्तु उद्योते छन्दसि बहुलम् इति बहुलग्रहणानुवृत्या यथाप्रयोगं लोकेऽपि प्रयुज्यते यङ्लुग् इत्यकथयत्।

**द्वितीयप्रमाणम्**-

यङन्तात् परस्य हलादेः पितः सार्वधातुकस्येड् वा स्यात् इत्यर्थके यङो वा इति सूत्रवृत्तौ यङ्लुग्विचारः वर्तते तन्मया अधः आलोच्यते।

कृषेश्छन्दसि इति सूत्रात् छन्दसि इति अनुवर्तनात् दाधर्तिदर्धतिदधर्षिबोभूतु-तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यत्कारिक्रत्कनिक्रदद्भरिभदिद्विध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मज्यागनीगन्तीति च इति सूत्रेण दाधर्त्यादयः छन्दसि एव निपात्यन्ते। तथा च बोभूतु तेतेक्ति इत्यदौ भूधातोः तिज्धातोश्च यङ्लुगन्ते गुणाभावः निपातितः। स्वाभवतः भूसुवोस्तिङि इत्यनेन गुणनिषेधे सिद्धे पुनः यङ्लुगन्तस्य छन्दसि गुणाभावदर्शनहेतोः निपातनं "यङ्लुकि भूसुवोस्तिङि इति गुणनिषेधश्चेत्तर्हि छन्दस्येव"इति नियमं ज्ञापयति। प्रोक्तञ्च दीक्षितेन- "भुसुवोस्तिङि[8] इति गुणनिषेधो यङ्लुकि भाषायां न बोभूतु तेतिक्ते इति छन्दसि निपातनात्"। तथा च नियमशरीरस्थ-एव इत्यस्य अवधारणार्थकत्वात् भाषायाम् न इति अवबुध्यते। तथा भाषायामपि यङ्लुक्प्रयुज्यते इति धीः।

भूधातोः यङ्प्रत्यये तस्य लुकि द्वित्वे जश्त्वे अभ्यासगुणे बोभु इत्यव्यवहिते परे तिङभावात् अप्रापकोऽयं "भूसुवोस्तिङि"[9] विधिः द्वित्वादनन्तरम्प्रकृतिभिन्नाद्। प्रकृतसूत्रेण भूधातोरेव गुणो विधीयते। द्वित्वे तु बोभू इति भिन्नैव प्रकृतिः। अतः दाधर्तिदर्धतिदधर्षिबोभूतुतेतिक्ते–इत्यदिसूत्रे बोभूतु इति निपात्यते। तथा सति "यङ्लुकि भूसुवोस्तिङि इति गुणनिषेधश्चेत्तर्हि छन्दस्येव"इति नियमप्रयोजनं किमिति शङ्का न कर्तव्या। प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् इति परिभाषया भूधातोरिव बोभू इत्यपि विधौ समाना प्रकृतिरिव आचरति। यङ्लुग् अपि प्रकृतिवद् गृह्यते इत्यत्र भाष्यप्रमाणं- "द्विःप्रयोगे द्विर्वचनं षाष्ठम्"। अस्य व्याखानां बालवोधिन्यां- "षष्ठाध्यायादौ एकाचो द्वे प्रथमस्य इत्यत्र किमिदं द्विर्वचनम्-

---

[6] अष्टाध्यायी- 3-4-117

[7] अष्टाध्यायी- 3-4-117

[8] अष्टाध्यायी- 7-3-88

[9] अष्टाध्यायी-7-3-88

एकाचः प्रथमस्य एकस्य स्थाने द्वितयात्मक आदेशः स्थान्यपेक्षया अन्यो विधीयते, उत स्थानिन एकस्य सतो द्विरुच्चारणं विधीयते, नतु तत्सथानिनः अतिरिच्यते इति संशय्य द्विःप्रयोगे द्विर्वचनमिति सिद्धान्तितम्"। ततश्च भू इत्यस्यैव बोभू इत्यस्यापि द्विः प्रयुज्यमानतया "भूसुवोस्तिङि"[10] इति सूत्रेण सार्वधातुके परे गुणः निषिद्ध्यते। तेन नियमशरीरावश्यकतायाः सिद्ध्यति भाषायामपि यङ्लुग् भवतीति।

उपसंहारः- अनेनैव प्रकारेण मया मे धीया सारल्येन अस्य मङ्गलश्लोकस्थाः अध्याहृतः तम् इति पदार्थविचारः, चरीकर्त्ति वरीभर्त्ति सञ्जरीहर्त्ति इति यङ्लुग्विचारः इति च व्याख्याताः।

**परिशीलनीयग्रन्थसूची**


1. अष्टाध्यायी, ज्ञानभारती पाब्लिकेशन्, दिल्ली, 2009
2. महाभाष्यं प्रदीपोद्योतसहितं छायाटिकोपेतञ्च, चौखाम्वा संस्कृतप्रतिष्ठान, वाराणसी
3. महाभाष्यम्, पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2008
4. वाक्यपदीयम्( ब्रह्मकाण्डम्), भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006
5. व्याकरणसिद्धान्तसुधानिधिः,सत्यप्रकाशदुवे, राजस्थानपत्रिका
6. व्याकरणसिद्धान्तसुधानिधिमर्मप्रकाशः, डा.पङ्कजकुमारव्यासः, राष्ट्रियसंस्कृतविद्या-पीठम्, तिरुपतिः 517507
7. शब्दकौस्तुभः, आचार्यः श्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 517507
8. संस्कृतव्याकरणशास्त्रैतिहासविमर्शः, अशोकचन्द्रगौरशास्त्री,भारतीय विद्यासंस्थान, वाराणसी,1997


[10] अष्टाध्यायी- 7-3-88